# Shri Nateshvarachintamanividya Stava

# શ્રીનટેશ્વરચિન્તામણિવિદ્યાસ્તવઃ

## Document Information

Text title : Shri Nateshvarachintamanividya Stava

File name : naTeshvarachintAmaNividyAstavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI. chidambararahasya mantrakalpataH

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2022

*sanskritdocuments.org*

# શ્રીનટેશ્વરચિન્તામણિવિદ્યાસ્તવઃ

શ્રીગણેશાય નમઃ ।
શ્રીચિત્સભેશાય નમઃ ।

સનત્કુમારઃ -
નન્દિકેશ શિવાનન્યભાવનાભાવિતાન્તર ।
શિલાદતનય શ્રીમન્ ચિદમ્બરસભાપતેઃ ॥ ૧॥

ચિન્તામણિમહાવિદ્યામન્ત્રવર્ણસ્તવોત્તમમ્ ।
મનનાત્સર્વપાપઘ્નં નૃત્તરાજપ્રિયઙ્કરમ્ ॥ ૨॥

પુરુષાર્થપ્રદં પુંસાં મોક્ષદં સર્વકામદમ્ ।
હરિણા બ્રહ્મણા દેવ રુદ્રેણાપિ સુરૈરપિ ॥ ૩॥

સદા સઙ્કીર્તિતં પ્રેમ્ણા વક્તુમર્હસિ તત્સ્તવમ્ ।
શ્રીનન્દિકેશ્વરઃ -
સનત્કુમાર વક્ષ્યામિ બ્રહ્મમાનસસમ્ભવ ॥ ૪॥

પુરા સ્કન્દાય દેવેન શમ્ભુના પ્રોક્તમદ્ભુતમ્ ।
નૃત્યતિ યો મહાદેવો દહરાકાશમધ્યમે ॥ ૫॥

તદીયમન્ત્રવર્ણાઢ્યં સ્તવરાજં વિશેષતઃ ।
બ્રહ્માદયોઽપિ યત્સ્તોત્રજપાદાપુર્મુનીશ્વર ॥ ૬॥

ઇષ્ટાર્થાન્ વાક્પતિત્વાદીન્ સાવધાનમનાઃ શ઼ૃણુ ।
અહમેવ ઋષિસ્તસ્ય છન્દોઽનુષ્ટુપ્ સભાપતિઃ ॥ ૭॥

દેવતા પ્રણવેનૈવ ન્યાસં કૃત્વા પઠેત્સ્તવમ્ ॥

વન્દેઽપસ્મારદેહસ્થિતમતિધવલં શ્રીતનું નૃત્તરાજં
 વામેનાકુઞ્ચિતાઙ્ઘ્રિં ડમરુકમભયં વહ્નિનૃત્તાભિનીતિમ્ ।
દક્ષે વામે દધાનં દ્વિદશમથ જટાજાન્હવીચન્દ્રચૂડં

દ્વીપીટ્ચર્માંમ્બરાઢ્યં ભુજગવલયિનં શ્રીજટાઢ્યાપરાઙ્ગમ્ ॥ ૮॥

વામે હસ્તે ચ વહ્નિં નયુતમથ કરે દક્ષિણે શિવસ્વરૂપં
નાદબ્રહ્મૈકનિષ્ઠં ડમરુકમભયં યં વકારં ચ વામે ।
હસ્તે શ્રીદક્ષિણેન સ્વપદસરસિજેનાત્મમોહં મધામ્ના
ત્વાક્રમ્યાવસ્થિતં ત્વાં ભજતિ હિ નિટિલે નિગ્રહાનુગ્રહાભ્યામ્ ॥ ૯॥

ધ્યાયેત્કોટિરવિપ્રભં ત્રિણયનં શીતાંશુગઙ્ગાધરં
દક્ષાઙ્ઘ્રિસ્થિતવામકુઞ્ચિતપદં શાર્દૂલચર્માંમ્બરમ્ ।
વહ્નિં ડોલકરાભયં ડમરુકં વામે શિવાં શ્યામલાં
કલ્હારં દધતીં પ્રલમ્બિતકરાં દેવીં સભેશં સદા ॥ ૧૦॥

વહ્નિં પાશં ચ લમ્બં ધનુરપિ મધુરં વામહસ્તૈશ્ચતુર્ભિઃ
બિભ્રાણં ચાન્યહસ્તૈર્ડમરુમપિ સૃણિં ચાભયં પુષ્પબાણાન્ ।
વામાર્ધાઙ્ગં પુમાંસં પરિચિનુ હૃદયે સ્વર્ણસંસદ્ભ્રકુંસં
સેવા હેવાક દેવાધિપમકુટતટી લોલુઠત્પાદપીઠમ્ ॥ ૧૧॥

ઓઙ્કારમન્ત્રસંવેદ્યં ઓતપ્રોતજગત્ત્રયમ્ ।
ચિન્તયામિ મહાદેવં ચિદમ્બર સભાનટમ્ ॥ ૧૨॥

હ્રીઙ્કારિણીં પ્રશંસન્તિ યન્માયામૂર્તિમાસ્તિકાઃ ।
ચિત્ત ચિન્તય તં દેવં ચિદમ્બરસભાનટમ્ ॥ ૧૩॥

પશ્યલ્લલાટં પ્રવહચ્છેખરં વિશ્વસૃટ્સ્રજમ્ ।
શિવમાલોકયામ્યન્તઃ ચિદમ્બરસભાનટમ્ ॥ ૧૪॥

રમ્ભોર્વશીમુખાદેવ્યો યદ્વામાઙ્ગપદાનુગાઃ ।
તમેકં દૈવતં વન્દે ચિદમ્બરસભાનટમ્ ॥ ૧૫॥

જ્યોતિઃ પ્રકટિતાનઙ્ગ ગર્વનિર્વાપણાલિકમ્ ।
પ્રણમામિ પ્રભું શમ્ભું ચિદમ્બરસભાનટમ્ ॥ ૧૬॥

તિસૃભિશ્શક્તિભિર્વિશ્વં વ્યશ્નુવાનમનાદિમમ્ ।
કલયામિ કલાતીતં ચિદમ્બરસભાનટમ્ ॥ ૧૭॥

હઙ્કારદુસ્સહવ્યાધેરગદઙ્કારમાદિમમ્ ।
અહં પ્રભું વ્રજામ્યાદ્યં ચિદમ્બરસભાનટમ્ ॥ ૧૮॥

સદાશિવં સદારાધ્યં સદાધારં સદોદિતમ્ ।

ચિરન્તનં સદા નૌમિ ચિદમ્બર સભાનટમ્ ॥ ૧૯॥

હન્ત્રીં પુરત્રયસ્યાહુઃ યસ્ય શક્તિં ત્રયીગિરઃ ।
તં નૌમિ સ્થિરધન્વાનં ચિદમ્બરસભાનટમ્ ॥ ૨૦॥

સર્વોત્તીર્ણપદં યસ્ય ન જાનન્તિ દિવૌકસઃ ।
તમાશ્રયેઽહં નૃત્તેશં ચિદમ્બરસભાનટમ્ ॥ ૨૧॥

વ્યોમેતિ નાદ ઇત્યાત્મેત્યન્તરાત્મેતિ યં વિદુઃ ।
ત્ર્યમ્બકં તં પ્રત્યેમિ ચિદમ્બરસભાનટમ્ ॥ ૨૨॥

મહીહૃદયમધ્યસ્થં મહાનાદવિજૃમ્ભિતમ્ ।
ચિત્તે ભજામિ ચિન્માત્રં ચિદમ્બરસભાનટમ્ ॥ ૨૩॥

વ્યોમકેશં વ્યોમપાદં વ્યોમાખ્યં વ્યોમવિગ્રહમ્ ।
વ્યોમાતીતં ભજે દેવં ચિદમ્બરસભાનટમ્ ॥ ૨૪॥

મહેશ્વરં મહાનન્દં મહાનાદં મહોદયમ્ ।
મમ નાથં પ્રપદ્યેઽહં ચિદમ્બરસભાનટમ્ ॥ ૨૫॥

વ્યોમ્નઃ શબ્દો ગુણો યસ્ય સપ્રવૃત્તિચતુષ્ટયઃ (૧) ।
તમાત્માનમવાપ્તોઽસ્મિ ચિદમ્બરસભાનટમ્ ॥ ૨૬॥

મ્નાધાતુર્યસ્ય માહાત્મ્યે પર્યવસ્યતિ ભૂયસા (૨) ।
તં નત્વા કૃતકૃત્યોઽસ્મિ ચિદમ્બરસભાનટમ્ ॥ ૨૭॥

શરાયિતરમાકાન્તં ધન્વાયિતધરાધરમ્ ।
શ્રયે ગુણાયિતાહીન્દ્રં ચિદમ્બરસભાનટમ્ ॥ ૨૮॥

કતિ(૩)વર્ણદ્વયં શ્લિષ્ટં યન્મન્ત્રાન્તરસઙ્ગતમ્ ।
શ્રીકણ્ઠં તં શ્રયામ્યેનં ચિદમ્બરસભાનટમ્ ॥ ૨૯॥

શિરોહૃદયમૂલેષુ સુધાતપશિખાત્મના ।
ભાસમાનં તમુદ્વીક્ષે ચિદમ્બરસભાનટમ્ ॥ ૩૦॥

વન્દારુસુરકોટીર નીરાજિતપદામ્બુજમ્ ।
ઉમાસખમુપાસેઽહં ચિદમ્બરસભાનટમ્ ॥ ૩૧॥

જ્યોત્સ્નાકમલિનીકાન્ત વામદક્ષિણલોચનમ્ ।
પરામૃશામિ પરમં ચિદમ્બરસભાનટમ્ ॥ ૩૨॥

તિર્યક્કુઞ્ચિતવામાઙ્ઘ્રિં તદેકાગ્રોલ્લસત્કરમ્ ।
પશ્યામ્યભયદં પુંસાં ચિદમ્બરસભાનટમ્ ॥ ૩૩॥

રામણીયકસર્વસ્વં યસ્ય વામાઙ્ગમિષ્યતે ।
તં નૌમિ શક્તિચક્રેશં ચિદમ્બરસભાનટમ્ ॥ ૩૪॥

નન્દામિ વીક્ષ્ય વીક્ષ્યેશં નવં નારાયણાર્ચિતમ્ ।
જૈમિનીયતપોરાશિં ચિદમ્બરસભાનટમ્ ॥ ૩૫॥

દયાતરઙ્ગિતાપાઙ્ગ દયિતાર્ધકલેવરમ્ ।
પ્રાજ્ઞૈર્નુતં પ્રશંસામિ ચિદમ્બરસભાનટમ્ ॥ ૩૬॥

(૪)નૃગાદિપૂર્વરાજેન્દ્રૈઃ પુણ્યશ્લોકૈરભિષ્ટુતમ્ ।
નિવેશયામિ હૃદયે ચિદમ્બરસભાનટમ્ ॥ ૩૭॥

(૫)તતયોગાર્ણનિર્દેશ્યં ષટ્ત્રિંશત્તત્ત્વનાયકમ્ ।
શેખરીકુરુ ચેતસ્ત્વં ચિદમ્બરસભાનટમ્ ॥ ૩૮॥

પરાત્પરતરં તત્ત્વં પારેમોહં પ્રતિષ્ઠિતમ્ ।
ભજેઽહં ભાવનાસિદ્ધ્યૈ ચિદમ્બરસભાનટમ્ ॥ ૩૯॥

રજસ્સત્વતમોરૂપગુણત્રયનિગુમ્ભનમ્ ।
આરાધયામ્યનૌપમ્યં ચિદમ્બરસભાનટમ્ ॥ ૪૦॥

પ્રકૃતિપ્રત્યયાત્માનં પ્રકાશં પરમેશ્વરમ્ ।
સેવે શેખરિતાર્ધેન્દું ચિદમ્બરસભાનટમ્ ॥ ૪૧॥

કાલારિં કાલયોક્તારં કામદં કામનાશકમ્ ।
વિમૃશામિ વિધીશાનં ચિદમ્બરસભાનટમ્ ॥ ૪૨॥

શાણોલ્લીઢેન્દુમણિવદ્યોતન્તે યસ્ય કિઙ્કરાઃ ।
તમેવ સ્થાપયામ્યન્તઃ ચિદમ્બરસભાનટમ્ ॥ ૪૩॥

નન્દનારણ્યલીલા મે ન કદાચન રોચતે ।
યમીક્ષ્ય યમિનાં ગમ્યં ચિદમ્બરસભાનટમ્ ॥ ૪૪॥

દર્શં દર્શં પ્રનૃત્યામિ મોહદ્રુમદવાનલમ્ ।
ચિન્તિતાર્થપ્રદાતારં ચિદમ્બરસભાનટમ્ ॥ ૪૫॥

નાદપઞ્ચક(૬)લાતીતવ્યુષ્ટસૌધવિહારિણમ્ ।
નાથં નાહં વિમુઞ્ચામિ ચિદમ્બરસભાનટમ્ ॥ ૪૬॥

(૭)થસ્થિતાનન્દસમ્મેલસમ્ભૂતગણનાયકમ્ ।
સભાજયામિ સર્વેશં ચિદમ્બરસભાનટમ્ ॥ ૪૭॥

(૮)રસામ્બુતેજઃપવન વ્યોમાર્કેન્દ્વાત્મ વિગ્રહમ્ ।
દિગમ્બરેશં ધ્યાયામિ ચિદમ્બરસભાનટમ્ ॥ ૪૮॥

કત(૯)યોરૈક્યમુદ્ભાતિ યસ્ય મન્ત્રાક્ષરાન્તરે ।
સ્મરામિ મન્ત્રદેહં તં ચિદમ્બરસભાનટમ્ ॥ ૪૯॥

પાશચ્છેત્તારમાત્માનાં પ્રૌઢકૃત્યેષુ પઞ્ચસુ ।
પતિં પ્રકાશયામ્યન્તઃ ચિદમ્બરસભાનટમ્ ॥ ૫૦॥

દુરિતધ્વાન્તમાર્તાણ્ડં દુર્મોહાર્ણવતારકમ્ ।
અર્ચામ્યામ્નાયજીવાતું ચિદમ્બરસભાનટમ્ ॥ ૫૧॥

કામ્ભોજકર્ણિકાપીઠકમનીયસુખાસનમ્ ।
આલોકયે હૃદાદર્શે ચિદમ્બરસભાનટમ્ ॥ ૫૨॥

પૂર્ણૈર્મનોરથૈર્યુક્તાઃ પૂજયા યસ્ય દેહિનઃ ।
ચિત્તભિત્તૌ લિખામ્યેનં ચિદમ્બરસભાનટમ્ ॥ ૫૩॥

જડાજડવિભેદેન જગદ્યસ્માદ્વિજૃમ્ભતે ।
પ્રપન્નોઽસ્મિ તમાત્માનં ચિદમ્બરસભાનટમ્ ॥ ૫૪॥

યાતુધાનાઃ પ્રણશ્યન્તિ યાશ્ચાન્યાઃ ક્ષુદ્રદેવતાઃ ।
યદ્ધ્યાનાત્તમહં પ્રેક્ષે ચિદમ્બરસભાનટમ્ ॥ ૫૫॥

મિથ્યાસત્યપરિચ્છેત્તા દ્રષ્ટા વક્તા પ્રમાતૃતા(કઃ) ।
હન્તા ચ તં સમેતોઽસ્મિ ચિદમ્બરસભાનટમ્ ॥ ૫૬॥

હ્રીમામનન્તિ છન્દાંસિ યા માયા સેત્યભિષ્ટુતામ્ ।
તયાઽનન્યં વરં યાચે ચિદમ્બરસભાનટમ્ ॥ ૫૭॥

શિવકામેશ્વરી યસ્ય શ‍ૃઙ્ગારકુલદેવતા ।
શિવકામં તમિચ્છામિ ચિદમ્બરસભાનટમ્ ॥ ૫૮॥

વાસના વિશ્વશક્તીનાં વામાઙ્ગે યસ્ય દૃશ્યતે ।
અધ્યક્ષયામ્યધીશં તં ચિદમ્બરસભાનટમ્ ॥ ૫૯॥

યૈકા મન્ત્રમયી યસ્ય સ્ફુરત્તા યા વિયન્મયી ।

તમાત્મીકુરુતે ચિત્તં ચિદમ્બરસભાનટમ્ ॥ ૬૦॥

નતિર્યસ્ય પ્રસૂતે દ્રાક્ સમ્પત્તન્ત્રાણિ દેહિનામ્ ।
નતોઽસ્મિ હૃદયાબ્જસ્થં ચિદમ્બરસભાનટમ્ ॥ ૬૧॥

મસ્તકેઽબ્જે સહસ્રારે યઃ શક્ત્યા સહ નૃત્યતિ ।
પશ્યામિ તમહં ભાવાત્ ચિદમ્બરસભાનટમ્ ॥ ૬૨॥

ઇત્યેવં શ્રીમદાનન્દનટેશસ્ય મહામનોઃ ।
વર્ણાઘસ્તવરાજોઽયં ચિન્તામણિસમાહ્વયઃ (૧૦)॥ ૬૩॥

ચિન્તામણિવદિષ્ટાર્થદાયી નૃત્તેશ્વરપ્રિયઃ ।
પ્રભાતકાલે પઠતાં માતૃકાવર્ણસિદ્ધિદઃ ॥ ૬૪॥

નિત્યંસઙ્કીર્તયેદ્ધીમાન્ ત્રિકાલં ચ વિશેષતઃ ।
ચિત્તે નૃત્યતિ તસ્યેશઃ ચિદમ્બરસભાનટઃ ॥ ૬૫॥

દુઃસ્વપ્નદુઃશકુનદુર્ગમદુર્મનસ્ક-
    દુષ્કૃત્યદુષ્ટતરદુઃખનિકરાશ્ચ બાધાઃ ।
યત્કીર્તનાદતિતરાં પ્રશમનં પ્રયાન્તિ
    શ્રીનૃત્તરાજપદમેત્યપુનર્ભવં ચ ॥ ૬૬॥

ઇતિ ચિદમ્બરરહસ્યે મન્ત્રકલ્પતઃ શ્રીનટેશ્વરચિન્તામણિવિદ્યાસ્તવઃ સમ્પૂર્ણઃ ।

૧. શબ્દસ્ય પ્રવૃત્તયઃ - પરાપશ્યન્તીમધ્યમાવૈસ્વર્યઃ ।
૨. મ્ના-અભ્યાસે-(ઇતિ ધાતુઃ) । અભ્યાસઃ - પારમ્પર્યેણ વૃત્તિઃ ।
૩. ક્તીતિસંયુક્તાક્ષરપરઃ ગુરુમુખૈકવેદ્યઃ ।
૪. ષોઽશસુ રાજસ્વન્યતમઃ ઇક્ષ્વાકુવંશ્યઃ ।
૫. તતયોગાર્ણઃ સંયુક્તતકાસ્મેત્યાકારકઃ ।
૬. નાદાદિપઞ્ચકલાતીતં-બ્રહ્મરન્ધ્રસ્થાનં તત્રવ્યુષ્ટં પ્રભાતં
    સૌધં - સભા તસ્મિન્ વિહારિણં
વિહરણ શીલમ્ ।
૭. “થ”-પર્વતઃ ।
૮. રસા ભૂમિઃ । આત્મા યજમાનઃ ઇતિ અષ્ટમૂર્તિઃ ।
૯. કતયોરેકવર્ણાકારકં ઐક્યઙ્ક્તેતિ।
૧૦. ૐ હ્રીં પરઞ્જ્યોતિઃ હંસ હંસ વ્યોમ વ્યોમ વ્યોમ્ના શક્તિ શિવજ્યોતિરાનન્દ
નૃત્તપરપ્રકાશાનન્દનાય રક્તપાદુકાં પૂજયામિ હ્રીં શિવાય નમઃ ઇતિ મનુઃ ।

Proofread by Aruna Narayanan

*Shri Nateshvarachintamanividya Stava*

pdf was typeset on July 10, 2022

Please send corrections to *sanskrit@cheerful.com*